## ।। अथ अष्टविंशोऽध्याय: ।। Chapter-28

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ नागिनीं लोकमातरम् ।।
यस्या दर्शनमात्रेण न याति नरकं नर : १

पुरा कृतयुगे राजन् मात्रा शप्ता भुजंगमा: ।।
क्षीरोदमथने जाते-कद्रुविनतयोरभूत् ।।

सुनीरोर्मूर्ध्दनि पणो महानुच्चै: श्रव:कृते ।। २

श्वेतबालधरोऽश्वेश्च उत स्यात्कृष्णबालधि: ।।
सित-पुच्छोऽयमेव स्यादित्याह विनता नृप ।। ३

नेति कद्रुरिमामाह स्यादसावसितद्युति: ।।
वृथा भवेद्वचो यस्या दासत्वं सा प्रपद्यते ।। ४

प्रातर्विलोकनीयोऽयमित्युक्ता जग्मतुर्गृहान् ।।
ततो रात्रौ फणीन्द्राणां कद्रुर्वृत्तान्तमभ्यधात् ।। ५

कद्रूरुवाच :- अथाहं विनताचोभे जग्मतु: कनकाचलम् ।।
उच्चै: स्थित्वा मथ्यमानं द्रक्ष्याव: क्षीरसागरम् ।। ६

----

( ए १) कन्द्रू

इति कृत्वा मतिं वत्सास्तुंगं शिखरमास्थितम् ।।
व्योमापगाप्रवाहेण परिधौतशिलातलम् ।। ७

चिन्तोपलच्छन्नभुवं कामधेनुपदांकितम् ।।
कल्पद्रुमपतत्पुष्पं प्रकरं हेमभासुरम् ।। ८

कल्पवल्लीप्रतानौघसम्भृतामरपादपम् ।।
विद्याधरीपदन्यासमञ्जुशिञ्जित[ए१]नादितम् ।। ९

कलस्वनशिखिव्रातकेकारवमनोहरम् ।।
शिखराग्रं समारुह्य पश्याव: सुरसंहतिम् ।। १०

मथ्यमाने ततस्तस्मिन् शृङ्खलायति केशवे ।।
मन्थाद्रिभ्रमणोद्घृष्टभुजोरुस्तम्भविच्युतैः[1] ।। ११

रोमपुञ्जैः परिस्तीर्णा हरि[2]लीलाकृतोदयैः ।।
तत्क्षणादुत्थितः श्रीमान् शक्रया[3]नतुरङ्गमः ।। १२

----

१ ई विच्युतम्
२ बी ई हरितामिः कृतोदयैः
३ बी हरियानं

श्लोक

(ए१) सज्जीरनादितं

गृहीत्वा तमानीय बद्धो दुर्वाङ्कुराञ्चिते ।।
भूप्रदेशे भृशं बलान्नश्वत्थदलचञ्चल: ।। १३

तमालोक्य महातुङ्गं हिमाचलतटोज्ज्वलम् ।।
विनता यामया सार्द्धे[1] विवादोऽभून्महापण: ।। १४

विनता श्वेतपुच्छं तमाह चाहं सितेतरम् ।।
यस्या वचो भवेन्मिथ्या दासीत्वं सा प्रपद्यते ।। १५

ततो मातु: प्रियं कार्यमविचार्य तनूद्भवै: १६

वामनेन पुरा मातुर्वचनाद्भ्रातृहेतवे ।।
भिक्षितस्त्रिपदीयज्ञे दानवेन्द्रो बलि: किल[2] ।। १७

चिरकारी मुनीन्द्राणां प्रवरो वचनात्पितु: ।।
न मातरं विनिर्दिष्टे चिरकारितयावधीत् ।। १८

कौपस्य विरमे पश्चाच्चिरकारिणमात्मजम् ।।
वरेणाच्छन्दयामास स्वच्छचेता महामुनि: ।। १९

-----

१ बी ई सार्द्ध

२ बी महाबलि: ( अथवा ) त्र महाबलो महाबलीति वा स्यात्

नास्ति मातृसमो दैवो नास्ति मातृसमा गति: ।।
नास्ति मातृसमो बन्धुरिह लोके परत्र च ।। २०

तस्मान्मातृवच: कार्यं पुत्रेण श्रेय इच्छता ।।
गुरूणां जनक: श्रेष्ठो माता चाष्टगुणा तत: ।। २१

कष्टाद्धारयते गर्भं कष्टात्पालयते शिशुम् ।।
कष्टं हृदि सदा धत्ते तस्या निष्टविशङ्किनी ।। २२

तपोभिर्नियमैर्विधास्तुतिपूजादिभि: सुरान् ।।
परितोष्य नरा: सर्वे पितृनथ कृतादरा: ।। २३

पुत्रानिच्छन्ति लोकेऽस्मिन् तेभ्यो भूरितरं स्त्रिय: ।।
यतन्ते पुत्रलाभाय यत: पुत्रफला: स्त्रिय: ।। २४

बह्वीभि: परिचर्याभि: कश्यपस्य महात्मन: ।।
लब्धा: कालेन महता सहस्त्रं यूयमात्मजा: ।। २५

---

१ सी रिज्या ई रियया
२ बी ई अत:

इति कृत्यमकृत्यं च श्रेय: पापं विमृश्यतु[1] ।।
प्रियं मम कृतम्चं हि प्रमाणं गुरवो यदि ।। २६

वत्सा गच्छत तत्राशु कृष्णाकेशकृतांकता[1,2]: ।।
किं ददामि पुनस्तुष्टा बरं वृणुत माचिरम् ।। २७

नागाऊचु: :- दैवि दास्यसि[3] भक्तानामस्माकं चैद्वरं परम् ।।
श्रीतीर्थे तदिहाकल्पं स्थिति कुरु हिताय न: ।। २८

इच्छितातिदयानाशु भक्तेभ्यो हरवल्लभे[4] ।। २८

देव्यु वाच :- नागै: श्रीतीर्थमागत्य तपोभिरभितोषिता ।।
तेनाहं नागिनी नाम्ना ख्यातिं यास्यामि भूतले ।। २६

वसिष्ठ उवाच :- इत्युक्त्वान्तर्दधे देवी कावेर्याश्च भूमिप ।।
देवीमूर्तिं प्रतिष्ठाप्य नागै: सर्वैर्विभूषिताम् ।। ३०

पुरीं भोगवतीं भूयो भेजिरे विगतज्वरा: ।। ३१

---

१ बी ई विमृश्यन,    २ बी कृष्णाकेशकृतान्तका:

३ कृताजैलितक :    २ बी ई दास्यति

४ ई क- सी १- वरवल्लभे    ( ए१) कृत

इत्थं तस्यैव पार्श्वे तु दृश्यते चापि नागिनी ।।
यां दृष्ट्वा न नरो जातु बाध्यते विषमैर्विषैः ।। ३२

कथामेतां स्मरति यः प्रणतः संपूर्णा लिखा।
परितुष्टा पराशक्तिर्नागिनी तस्य जायते ।। ३३

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां

ब्राह्म्य विभागे तृतीयपरिच्छेदे श्रीमाल माहात्म्ये नागिनी

माहात्म्यं नाम अष्टाविंशोऽध्यायः ।। २८ ।।

---

## ।। अथ एकोनत्रिंशोऽध्याय : ।। Chapter-29

वसिष्ठ उवाच :-

ततो गच्छेन्नृपश्रेष्ठ देवीं मुकुलिनीं नरः ।।
या पुरा श्रीपुरे राजन्मुकुलेनातितोषिता[1] ।। १

आसीद्धुरि धनेशानां श्रेष्ठायां मुकुलो वणिक् ।।
यजनप्रवणो नित्यं मणिमुक्तापणप्रियः ।। २

पितामहर्द्धिनामासीत्तस्य वृद्धो गुणास्पर्द ।।
दान्तः शान्तो वणिक् वंशे श्रीपुरे धर्मतत्परः ।। ३

प्रभद्रा सुता तस्य रूपलावण्यभाजनम् ।।
स्पर्द्धया रूपसम्पद्भिर्जिता परपुराङ्गना[2] ।। ४

सौदामिनीव प्रभया चन्द्रज्योत्स्नेव शोभया ।।
रूपेण स्मरकान्तेव लावण्येनेव चोर्वशी ।। ५

वीणेव[3] मधुरालापा हंसीव मृदुगामिनी ।।
मनोभूबाणविच्छोक[4]स्थलीवारोहरोहिणी ।। ६

----

१ क सी डी ख- नाभितोषिता ।।
२ क २ सी २ - सुरासुराङ्गना ।।
३ बी ई - वाणीव
४ बी २ - विब्बोक

सुस्पर्शा बिशवल्लीब मल्लीब बहुसौरमा ।।
कदलीवबृहत्पत्रा पवित्रा यज्ञभूरिव ।। ७

पद्मिनीब सकमला सतांधीरिब निर्मला ।।
मृगीव रमणीयाज्ञी सिंहीव सुतनूदरी ।। ८

स्पृहणीया मनुष्याणां तृष्णार्तानां यथापगा ।।
दीपवर्त्तिरिव स्निग्धा मुग्धालेखेव चैन्दवी ।। ९

नम: सरिदिबाचाभ्या निधि: सौभाग्यसम्पदा ।।
यदि जायेत सर्गादौ सा निःसीमगुणा नृप ।। १०

तन्मन्ये मदनो बीक्ष्य न लभेत रतो रतिं ।। ११

अनवद्यपदन्यासा न्यासभूतेव वेधस: ।।
सा क्रमेण वणिग्गेहे यौवनं वपुषाग्रहीत् ।। १२

कदाचन वयस्याभि: सह श्रीमालसीमनि ।।
ययौ प्रमद्वरा प्रेष्ठा पुष्पावचयहेतवे ।। १३

---

१ बी प्रेम्णा

श्लोक (ए १) नी

सौगन्धिकगिरेः पार्श्वे वनं कुसुमितद्रुमम्[ए१] ॥
अवन्त्या उत्तरे कूले विहंगमकुलाकुले ॥ १४

बहिः पुष्पवनोद्यानवहुले विपुले पथि ॥
स्त्रिर्यतं तत्राङ्गैः सार्द्धं सखुपदिशधारिभिः ॥ १५

उत्फुल्लनयनाम्भोजा शम्भोर्नायिव शैशवे ॥
पुष्पस्तवकमादत्ते चम्पकाद्यावदंगना ॥ १६

तावत्कलिमुखी नाम राक्षसी रौद्रदर्शना ॥
तामादायबलाद्दोर्भ्यां व्योमपन्थानमाक्रमत् ॥ १७

सा[ए२] त्रासात् ललितापांगी राजन् संकुचितांर्गका ॥
रुदती[ए३] सहसा तन्वी हंसीव श्यैनसंगता ॥

त्राहि त्राहीति चुक्रोश करुणं विह्वला मुहुः ॥ १८

अत्रान्तरे विधिवशात्प्लवंगी नाम राक्षसी ॥
दूती त्वरितमागच्छन्तरितायाः सुरेश्वरी ॥ १९

---

१ सी सी (ग) नरेश्वर, ह नगरेश्वर (ए१) द्रुमम्
(ए२) सात्राला
(ए ३) रुदन्ती

सा वटेश्वरकान्ताया योगिनीभिः समां किल ।।
सौगन्धिकगिरिर्वरं प्राप्ता कैलाश पर्वतात् ।। २०

क्रीडां कर्तुमना देवी त्रिशूलं बिभ्रती करे ।।
ए १
श्रुत्वा करुणमाराव कुमार्याः खेड्वलम्ब्य सा ।। २१

हत्वा कलीमुखीं देवीं त्रिशूलेन हृदि क्षणात् ।।
कन्यामुत्संगमारोप्य सखीमध्ये समत्यजत् ।। २२

तां विलोक्य विलोलाक्षा तेनारा शिमिबोधितां ।।
प्रणम्य शिरसा देवीं लवंगीमिदमालपत् ।। २३

मोचिताऽहं त्वया मातर्मृत्योर्दंष्ट्रान्तरं गता ।।
यातुधानी त्रिशूलेन हत्वा दुष्टां नमस्तले ।। २४

बलिं देवि प्रदास्यामि तुभ्यं पशुसुरादिकं ।।
यावद् गच्छामि पितरं भ्रातरं निजवेश्मनि ।।

इह तावद्दिवि क्षोणीतले वा तिष्ठ खेचरि ।। २५

---

१ बी कुर्वन्त्याः करुणारावं कुमार्याः खे वलम्ब्य सा ।।

२ बी वितान्

श्लोक

( त्रिशूलं बिभ्रती करे । कृत्वाकरुण माराबकुमार्याः खेललम्ब्यसा ।।
हृत्वाकलीमुखीं देवीं)

( ए १) कृत्वा

| | | |
|---|---|---|
| प्लवंग्युवाच :- | उज्जवलाया महादेव्या दूती नाम्ना प्लवंगिका ।। | |
| | त्वयि वै ह्रियमाणायां काकतालीयवद्भवात् ।। | २६ |
| | अकस्मादागता भद्रे तव भाग्यमहोदयात् ।। | |
| | कृतः प्रत्युपकाराय मनस्तन्मम धावति ।। | २७ |
| | याहि शीघ्रं स्वकं गेहमानन्दय सुहृज्जनम् ।। | २८ |
| वसिष्ठ उवाच :- | इत्युक्ता सा वणिक्पुत्री भूयो भूयो भ्ययाचत ।। | |
| श्रीमद्दारीवाच :- | मातर्मा नः कुले जायात्कृतघ्नो नास्तिकोऽथवा ।। | |
| | कृतघ्नेन कुलं पुंसामदुष्टमपि दूष्यते ।। | २६ |
| | त्वत्तः प्राणानवाप्याहं मातर्मृत्योर्वशंगता ।। | |
| | बलिमात्रमयच्छन्ती सुखं जीवामि किं भुवि ।। | ३० |
| प्लवङ्ग्युवाच :- | वत्से विरम निर्बन्धाद्वयमद्य पशुप्रिया: ।। | |
| | ददाना विविधान् भोगान् भक्तेभ्यश्च सचराचरे ।। | ३१ |
| | विचरामः कुमारि त्वं याहि गेहमपज्वरा ।। | ३२ |

----

१बी तौचलायक, ई तोचलया (ए २) ह्रीयमाणायां

४ ई बी भयो भूयः प्रयाचते (ए ३) जरात्

५ क सी नास्तिको थवा (ए ६) मृत्योर्वशंगता

कुमार्युवाच :- नाहं देवि गृहं[१] यामि त्वामिहोत्सृज्य कर्हिचित् ।।
त्वत्पदाम्भोजरजसागाकरोस्तु शिरो मम् ।। ३३

जनन्या नहि मे कार्यं न पित्रा न च बन्धुभि: ।।
प्राणप्रदां मुद्रायुक्तां त्वामच्चर्यितुमुत्सुका ।। ३४

हे सख्यौ व्रजत क्षिप्रं महद्दैर्जनकस्य मे ।।
भ्रातुश्च[२] मुकुलस्याग्रे वृत्तमेतन्निवेद्यताम् ।। ३५

मयि पुत्र्यां यदि प्रेम कर्तव्यो हि सुद्भया ।।
तदिहागम्यतां शीघ्रं पशुमधबलिक्रियां ।। ३६

कर्तुकामै: सुरेश्वर्या: प्लवंग्या: कैलिकाननै ।। ३७

वसिष्ठ उवाच :- एवं तस्या वच: श्रुत्वा प्रियसख्या: सखीजन: ।।
क्षिप्रमारुह्य यानानि गृहं यात: सविस्मय:[३] ।। ३८

अखिलं तत्पितुर्वृत्तं सुतायाश्च न्यवेदयत् ।।
सम्भ्रान्तमनस: सर्वे समाजग्मु: सुहृज्जना: ।। ३९

----

३ बी ई सविस्मयम्

२ ए भ्रातुपुलस्याग्रे ( इ १) याहि

मुकुलो पि स्वसुमोचां राक्षास्याः श्रुतवान्[1] वने ।।
पितरं नोदयामास प्लवंग्या[2] बलिकर्मणि ।। ४०

मुकुलउवाच :- नमश्चन्द्रकलाहीनं भवेत्तात यथा निशि ।।
दिवसे पृथिवी सूर्यप्रभाहीना यथा भवेत् ।। ४१

तथा तात गृहस्थानां गृहं दुहितरं बिना ।।
एका बाला सुलावण्या सुशीला विदुषी तथा ।। ४२

यातुधानीहृता दैव्या मोचिता तामुपास्महे ।।
यद्यप्युद्भवेद् बहुमतं पशुमथादिकं महत् ।। ४३

तत्त्वेयं विशेषेण कृतोपकृतये प्रभो ।।
यदि प्रेमालया गेहान्नायाति भगिनी मम ।।
प्रयोजनमिह प्राणैः किमहो तन्महोदयैः ।। ४४

वसिष्ठ उवाच :- इत्थं निशम्य पुत्रस्य महर्द्धिर्मुकुलस्य तत् ।।
आहूय गृहिणीं साध्वीं बलिं कर्तुमनूनुदत् ।। ४५

----

१वी ई राक्षसः (ए १) प्लवाबलिकर्मीपि

अथ तस्य तदा गेहे स्फीतिमत्यतिमानुषम् ।।
विचित्रपाकरुचिरं बलिं कल्पितवत्यसौ ।। ४६

सुतायाः परितोषाय प्लवंगीपूजनाय च ।।
विक्रयेणानयामास मदिरां मदिरेक्षणा ।। ४७

महर्द्धिदयिता राजन्नथो भर्त्तारमब्रवीत् ।। ४८

गृहिण्युवाच :- यथाशक्त्या[१] ह्युपहृतो बलिरेष मया प्रिय ।।
अन्तरेण पशुं तत्र स्वधर्मोचितमाचर ।। ४९

वसिष्ठ उवाच :- इति श्रुत्वा प्रियावाक्यमुचितज्ञो वणिक् तदा ।।
आहूय विदुषो विप्रानपृच्छन्नतकन्धरः ।। ५०

महर्द्धिरुवाच :- विप्राः शृणुत यत्कार्यमविचार्य सुतार्थतः ।।
मम प्रमद्वरा कन्या सखीभिः सहकौतुकात् ।। ५१

सौगन्धिकगिरेः पार्श्वे कुसुमोद्यानमाव्रजत् ।।
तत्र लावण्यलोभेन यातुधान्या हृता बलात् ।। ५२

---

( ९ १) यथाशक्त्या पपहृवतो ।

अबलां दिवि रोदन्तीं क्रन्दन्तीं साश्रुलोचनाम् ।।
प्राचीनसुकृतामोगा त्प्लवगी नाम खेचरी ।। ५३

प्राप्य मोचयदाहृत्य त्रिशूलेन निशाचरी ।।
विमुक्तया तनुजया सा प्रमद्वरया मम ।। ५४

प्रणाम्य पशुभिश्चैयंपक्वान्नैर्बलिकर्मणि ।।
अभ्यर्थिता प्लवगी सा तस्थुषी पुष्पकानने ।। ५५

यथोपपत्ति यत्कर्म बल्यर्थं विहितं मया ।।
वरं पशुप्रहारोऽयं कथं कार्यो निवैयताम् ।। ५६

ब्राह्मणाऊचुः :- साधु साधु महाप्राज्ञ महर्द्धे वणिजां वर ।।
अविचार्य च नो चक्रे सहसा पशुपातनम् ।। ५७

अमृतं परमं ह्येतद् ह्येतच्चमत्कारतुर्लभम् ।।
यद् ब्राह्मणमुखात्कार्यं श्रुत्वा लोकः प्रवर्तते ।। ५८

---

१ ई क- सी पुण्य
२ बी अभिचार्य
४ ई बी - ह्येतेतश्रेष्ठं चमत्कारत्तमम्

श्लोक श्लोक
अधः मोचय पक्कन्नैबलिकर्मणि । अभ्यार्थि

ब्राह्मणं शान्तिसम्पन्नं कुलीनं शंसितव्रतम् ।।
वासयेत गृहे राजन्न तस्मात्परमस्ति वै ।। ५९

मवला न पशुः कार्यः साक्षाद्दैव्याः पुरः क्वचित् ।।
कर्तव्यं क्षत्रियस्यैतन्न विप्रवणिजामिह ।। ६०

सर्वोपयाचितविधौ विधेयः कृतिभिः पशुः ।।
पिष्टेन यागादन्यत्र मनुः स्वायंभुवो ब्रवीत् ।। ६१

एतद्वेदोदितं कर्म पशुबन्धो मखेषु च ।।
यज्ञार्थं पशवः सृष्टा विधिना दैवतृप्तये ।। ६२

पशौ शूद्रेण संज्ञप्ते ह्यवदानानि सौमपैः ।।
श्रुतिमन्त्रैरुपाकृष्य होतव्यानि नचान्यथा ।। ६३

तस्मान्महर्द्दे[1] नादेयो देवदेयोऽध्वरे पशुः ।।
तद्धेनः स्यात् शमितरि यज्विनां न कदाचन ।। ६४

---

१बी तस्मात् मखर्द्धे न देयाध्वरे पशुः

बसिष्ठ उवाच :- इत्याकर्ण्य द्विजेन्द्राणां धर्मशास्त्रोदिता गिर: ।।
सर्वोपस्करसम्पन्नं बलिमादाय सत्वरं ।। ६५

ययौ परिवृत: सर्वै: सुहृद्भिश्च समं नृप ।।
मृकुलेनान्वितो धीमान् पितृभक्तेन सूनुना ।। ६६

ततोऽपश्यत् प्लवंगीं तां ज्वलन्तीमिव तेजसा[१] ।।
प्रमद्‌रागृहीतांघ्रिकमलां मौलिना मुहु: ।। ६७

प्रणेमु: पृथिवीपीठलुण्ठनैस्ते वणिग्गणा: ।।
उपलिप्य भुवं पुण्यां महतीं विलुणीकृतां ।। ६८

स्वस्तिकै: शंखपद्मैश्च कुसुमप्रकरैरपि ।।
यथाक्रमं बलि: सर्वो निहित: स्वहितैषिभि: ।। ६९

सद्य: स्फुटत्पुष्पमाला सौरभ्यसुभगो बलि: ।।
श्रीखंडागरुकर्पूरचन्दनादि विलेपनम् ।। ७०

---

१ बी मित्र तेजसा

नैवेद्यगीतनृत्याद्यैः अभ्यर्च्य गिरिजानुजाम्।।
पशुं पिष्टमयं कृत्वा पातनायोपचक्रमे ।। ७१

ततो दैवी प्लवंगी सा जिज्ञासुस्तन्मनः स्थितम्।।
अवोचत महर्द्धिस्तं मुकुलं गुरुवत्सलम्।। ७२

देव्युवाच :- मा मा विरम कर्मेदमन्यथा क्रियते त्वया ।।
उपयोच्यः[1] पशुः साक्षात्कथं प्रतिनिधीयते ।। ७३

वृथा तव बलिः सर्वो नोपयोग्यो मम क्वचित् ।।
विभवे सति मूढानां वित्तशाठ्यं मखाय[2] वै ।। ७४

प्रमद्वरे गृहं याहि मम नैष प्रियो बलिः ।। ७५

वसिष्ठ उवाच :- श्रुत्वैतद्वचनं देव्या महर्षिर्मुकुलान्वितः ।।
जगाम परमं खेदं सुहृद्भिः सह शंकितः।। ७६

चिन्तामवाप महती शास्त्रगर्हे[3] पशोर्वधे ।।
यातु दारासुतापुत्रसुहृद्धान्यधनादिकम्।। ७७

---

१ बी ई उपयाच्य
२ बी ई मधाये बै
३ बी गर्हा

स्कः कदापि मे लोपं माप्नुयाद्धर्मः कथंचन ॥
इति स्थिते गुरौ दोषान्मुकुलः शीलसम्मतः ॥ ७८

दध्यौ सा पां कथं कृत्वा मम श्रेयः परं भवेत् ॥
कुलं संशयितं सर्वं मोचयामि शुचः कथं ॥ ७९

तस्मादिह पशोः स्थाने भविष्याम्यहमेव हि ॥
यः पुमानखिलं गोत्रं कुलं वा विषमेस्थिते[1] ॥ ८०

विमोचयत्यात्मवधस्तस्यसच्छिद: प्रशस्यते ॥ ८१

इत्थं विचिन्त्य सहसा कोशादाकृष्य शस्त्रिकां ॥
शिरश्छेत्तुमुपाक्रान्तः पश्यतां सर्वदेहिनां ॥ ८२

ततः स्मितमुखी देवी तं गृहीत्वा करे स्वयं ॥
नैवं वत्स मया भक्तितत्त्वजिज्ञासया हि वः ॥
उक्तं पशुकृते शास्त्रं त्वत्पिता न तु मुञ्चति ॥ ८३

----

बी इ विषमैस्थितै

तस्मान्मुकुल[1] तुष्टास्मि वरं वृणु यथेप्सितम् ।।
अप्रदेयं न मत्तोऽद्य: किञ्चिदस्ति मयानघ ।। ८४

वसिष्ठ उवाच :- एवमुक्त: स्वयं देव्या मुकुल: कुलनन्दन: ।।
विमुच्यशस्त्रिकामंघ्रिमूले देव्या लुठन् भुवि ।। ८५
सहर्ष[2] गद्गदैर्गेर्वाणीमिदमुक्तवान्[3] ।। ८६

मुकुल उवाच :- सुरेश्वरि प्रसन्नासि यदि देवी वरो मम ।।
श्रियोऽत्र प्रवरे क्षेत्रे यावदाभूतसम्प्लवम्[4] ।।
स्थितिं कुरु प्रपन्नानां साधयन्ती मनीषितम् ।। ८७

देव्युवाच :- देवी मुकुलिनी नाम्ना श्रीपुरस्यान्तिकेऽनघ ।।
स्थास्यामि तव नाम्ना वै विश्रुता धरणीतले ।। ८८

यो मां मुकुलदेवीति ख्यातं पशुसुरादिभि: ।।
बलिभिश्च विचित्रान्नैस्तस्य दास्यामि वाञ्छितम् ।। ८९

---

१ बी ई मुकुल
२ ई क- सी १ मुकलो
३ बी - मित्यमुक्तवान्
४ ई बी यावदाहूत

इत्युक्त्वान्तर्दधे दैवी बलिना तैन वै सह ।।
महर्द्धिरपि तत्राप्तै: कारयामास शिल्पिभि: ।। ६०

दैव्या मूर्ति महोच्छ्रायं प्रासादं च विचक्षण : ।।
स्त्रवन्त्या दक्षिणे कूले व्ययित्वा विपुलं धन ।। ६१

तदा प्रभृति सा दैवी नाम्ना मुकुलिनी नृप ।।
प्रमद्वरा विमोक्षेण श्रीनगर्यामिवातरव् ।। ६२

-----

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्य-विभागे तृतीयपरिच्छेदे श्रीमालमाहात्म्ये मुकुलिनी-माहात्म्यं ।

नामैकोनत्रिंशोऽध्याय ।। २९